२युद्धे ३सङ्गते च मेदि०। आर्हतमतसिद्धे प्राणिपीड़ापरिहारेण सम्यग्गमने सा च पञ्चविधा अर्हत्शब्दे ३८५ पृ० दृश्या। [२आकृतौ सत्त्विमता० ।

**समिथ** पु० सम+इण–थक्। १वह्नौ २युद्धे च सि०कौ०।

**समिध्** स्त्री समिध्यतेऽनया सम्+इन्ध–करणे क्विप्। १काष्ठे २होमीयकाष्ठभेदे च तल्लक्षणं छन्दोग० "नाङ्गुष्ठादधिका नोना समित् स्थूलतया क्वचित्। न निर्मुक्तत्वचा चैव न सकीटा न पाटिता। प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका। न सपत्रा न निर्वीर्या होमेषु च विजानता" इति। तस्य निषिद्धलक्षणं यथा "विशीर्णा विदला ह्रस्वा वक्राः स्थूला द्विधाकृताः। कृमिदष्टाश्च दीर्घाश्च समिधो नैव कारयेत्" तत्र दोषो यथा "विशीर्णायुःक्षयं कुर्य्याद्विदला पुत्रनाशिनी। ह्रस्वा नाशयते पत्नीं वक्रा बन्धुविनाशिनी। कृमिदष्टा रोगकरी विद्वेषकरणी द्विधा। पशून् मारयते दीर्घा स्थूला चार्थविनाशनी" तन्त्रसा०। [त्रिका०।

**समिध** पु० समिध्यते सम्+इन्ध–क। १काष्ठे २वह्नौ च

**समिन्धन** पु० सम्+इन्ध–करणे ल्युट्। १काष्ठे शब्दच०। भावे ल्युट्। २सम्यग्दीप्तौ च।

**समीक** न० सम–ईकक्। युद्धे अमरः।

**समीकरण** न०असमः समः क्रियतेऽनेन सम+च्वि+कृ ल्युट्। वीजगणितप्रसिद्धे अज्ञातसंख्यानां यावत्तावदादीनाम व्यक्तराशीनां संख्या ज्ञानार्थं १प्रक्रियाभेदे २तुल्यरूपतापादने च।

**समीक्ष** न० सम्यगीक्ष्यतेऽनेन घञ्। १सांख्यदर्शने त्रिका०। भावे घञ्। २पर्य्यालोचने ३सम्यग्ज्ञाने च पु०। स्त्री। समीक्षाप्यत्र। ४तत्त्वे ५बुद्धौ मेदि० ६मीमांसाशास्त्रे ७यत्ने च स्त्री शब्दच०।

**समीक्ष्यकारिन्** त्रि०समीक्ष्य पर्य्यालोच्य करोति कृ–णिनि उप०। वस्तुस्वरूपपर्य्यालोचनपूर्वककार्य्यकारके।

**समीच** पु०सम्+इण–चट् कित् दीर्घश्च। १संयुक्ते २हरिण्यां स्त्री ङीप् उज्ज्वलद०। ३वन्दनायां स्त्री त्रिका०।

**समीचीन** त्रि० सम्यग्भवः सम्+अन्च–क्विप् ततः ख समः समिः अञ्चेरकारलोपे पूर्वपददीर्घः। १यथार्थे २साधौ ३सत्ये न० हेमच०। ४सत्ययुते त्रि०।

**समीनिका** स्त्री समां प्राप्य प्रसूते ख ततः स्वार्थे क। प्रतिवर्षं प्रसूतायां समांसमीनायां गवि शब्दच०। [अमरः

**समीप** त्रि०सङ्गता आपोऽत्र अच् समा०आत ईत्त्वम्। निकटे

**समीर** पु० सम्यक् ईरयति नोदयति सम्+ईर–अच्। १वायौ अमरः। २शमीवृक्षे राजनि०। पृषो०। समरोऽप्यत्र राजनि०। [३पथिके मेदि०। भावे ल्युट्। सम्यग्गतौ न०।

**समीरण** पु० सम्+ईर-ल्यु। १वायौ २मरुवकवृक्षे अमरः

**समीरित** त्रि० सम्+ईर–क्त। १कथिते २उच्चारिते "चतुर्मुखसमीरिता" कुमारः।

**समीहित** त्रि०सम्+ईह–क्त। १अभीष्टे २सम्यक्चेष्टिते न०।

**समुख** त्रि० सह मुखेन मुखव्यापारेण वा सहस्य सादेशः। १वावदूके हेमच०। २वाग्मिनि च।

**समुचित** त्रि० सम्+उच–क्त। सम्यग् उपयुक्ते समञ्जसे।

**समुच्चय** पु०सम्+उद्+चि–अच्। १हितादीनां राशौ अमरः परस्परनिरपेक्षाणामनेकेषामेकस्मिन् २क्रियादावन्वये च यथा देवदत्तो यज्ञदत्तश्च गच्छतीत्यत्र देवदत्तयज्ञदत्तयोः परस्परसापेक्षताभावेऽपि एकस्मिन् गमने अन्वयः। तद्वाचकस्य प्रायेण चकारः क्वचित् तथादिशब्दोऽपि। ३समाहारे शब्दच०।

**समुच्चित** त्रि० सम्+उद्+चि–क्त। कृतसमुच्चये "समुच्चितफलकामनानामि"ति विधिस्वरूपे गदाधरः।

**समुच्च(चा)र** पु० सम्+उद्+चर–अप् घञ् वा। सम्यगुच्चारणे २सम्यक्त्यागे च। [पाटने च।

**समुच्छेद** पु० सम्+उद्+छिद–घञ्। १विनाशे २समूलोत्

**समुच्छ्र(च्छ्रा)य** पु० सम्+उद्+श्रि–अच् घञ् वा। १अत्युन्नतौ २विरोधे ३उत्सेधे च मेदि०।

**समुच्छ्रित** त्रि० सम्+उद्+श्रि–क्त। अत्युन्नते।

**समुच्छलित** त्रि०सम्यक्+उच्छलितम् सम्+उद्+शल–क्त वा। समन्तात् विस्तीर्णे (कुत्रापि) "समुच्छलितविभ्रमा गतिः" काव्यप्र०। [युक्ते २अत्युज्जीविते च।

**समुच्छ्वसित** त्रि० सम्+उद्+श्वस–क्त। १सम्यगुच्छ्वास

**समुच्छ्वास** पु० सम्+उद्+श्वस–घञ्। मुखनासिकाभ्यां प्राणवायोर्व्यापारे। [गुह्यमने।

**समुज्झित** त्रि० सम्+उज्झ–क्त। त्यक्ते अमरः। [२सम्य

**समुत्क्रम** पु० सम्+उद्+क्रम–घञ् न वृद्धिः। १ऊर्द्धगमने

**समुत्क्रोश** पुंस्त्री०सम्यक् उत्क्रोशति उच्चैः शब्दायते सम्+उद्+क्रुश–अच्। १कुररविहगे शब्दच० स्त्रियां ङीष्। भावे घञ्। २अत्युच्चैःशब्दे [व्युत्पन्ने २उत्थिते च।

**समुत्थ** त्रि०सम्यगुत्तिष्ठति सम्+उद्+स्था–क सस्य थः। १स

**समुत्थान** न० सम्+उद्+स्था–करणे ल्युट् सस्य थः। १समुद्योगे २उत्तोलने ३व्याधिनिर्णये च मेदि०।